শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীকৃষ্ণাষ্টোত্তরশতনামস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীকৃষ্ণাষ্টোত্তরশতনামস্তোত্রম্ ॥

ছাযাযাং পারিজাতস্য হেমসিংহাসনোপরি।
আসীনমম্বুদশ্যামমাযতাক্ষমলংকৃতম্ ॥

চন্দ্রাননং চতুর্বাহুং শ্রীৱৎসাঙ্কিতৱক্ষসম্।
রুক্মিণীসত্যভামাভ্যাং সহিতং কৃষ্ণমাশ্রযে ॥

শ্রীকৃষ্ণঃ কমলানাথো ৱাসুদেৱঃ সনাতনঃ।
ৱসুদেৱাত্মজঃ পুণ্যো লীলামানুষৱিগ্রহঃ ॥ 1 ॥

শ্রীৱৎসকৌস্তুভধরো যশোদাৱৎসলো হরিঃ।
চতুর্ভুজাত্তচক্রাসিগদাশঙ্খাদ্যুদাযুধঃ ॥ 2 ॥

দেৱকীনন্দনঃ শ্রীশো নন্দগোপপ্রিযাত্মজঃ।
যমুনাৱেগসংহারী বলভদ্রপ্রিযানুজঃ ॥ 3 ॥

পূতনাজীৱিতহরঃ শকটাসুরভঞ্জনঃ।
নন্দৱ্রজজনানন্দী সচ্চিদানন্দৱিগ্রহঃ ॥ 4 ॥

নৱনীতৱিলিপ্তাঙ্গো নৱনীতনটোঽনঘঃ।
নৱনীতনৱাহারো মুচুকুন্দপ্রসাদকঃ ॥ 5 ॥

ষোডশস্ত্রীসহস্রেশস্ত্রিভঙ্গী মধুরাকৃতিঃ।
শুকৱাগমৃতাব্ধীন্দুর্গোৱিন্দো যোগিনাং পতিঃ ॥ 6 ॥

ৱৎসৱাটচরোঽনন্তো ধেনুকাসুরভঞ্জনঃ।
তৃণীকৃততৃণাৱর্তো যমলার্জুনভঞ্জনঃ ॥ 7 ॥

উত্তালতালভেত্তা চ তমালশ্যামলাকৃতিঃ।
গোপগোপীশ্বরো যোগী কোটিসূর্যসমপ্রভঃ॥ **8**॥

ইলাপতিঃ পরংজ্যোতির্যাদবেন্দ্রো যদূদ্বহঃ।
বনমালী পীতবাসাঃ পারিজাতাপহারকঃ॥ **9**॥

গোবর্ধনাচলোদ্ধর্তা গোপালঃ সর্বপালকঃ।
অজো নিরঞ্জনঃ কামজনকঃ কঞ্জলোচনঃ॥ **10**॥

মধুহা মথুরানাথো দ্বারকানাযকো বলী।
বৃন্দাবনান্তঃ সঞ্চারী তুলসীদামভূষণঃ॥ **11**॥

স্যমন্তকমণের্হর্তা নরনারাযণাত্মকঃ।
কুব্জাকৃষ্ণাংবরধরো মাযী পরমপূরুষঃ॥ **12**॥

মুষ্টিকাসুরচাণূরমল্লযুদ্ধবিশারদঃ।
সংসারবৈরী কংসারির্মুরারির্নরকান্তকঃ॥ **13**॥

অনাদিব্রহ্মচারী চ কৃষ্ণাব্যসনকর্ষকঃ।
শিশুপালশিরশ্ছেত্তা দুর্যোধনকুলান্তকঃ॥ **14**॥

বিদুরাক্রূরবরদো বিশ্বরূপপ্রদর্শকঃ।
সত্যবাক্ সত্যসঙ্কল্পঃ সত্যভামারতো জযী॥ **15**॥

সুভদ্রাপূর্বজো বিষ্ণুর্ভীষ্মমুক্তিপ্রদাযকঃ।
জগদ্গুরুর্জগন্নাথো বেণুনাদবিশারদঃ॥ **16**॥

বৃষভাসুরবিধ্বংসী বাণাসুরকরান্তকঃ।
যুধিষ্ঠিরপ্রতিষ্ঠাতা বর্হিবর্হাবতংসকঃ॥ **17**॥

পার্থসারথিরব্যক্তো গীতামৃতমহোদধিঃ।
কালীযফণিমাণিক্যরঞ্জিতশ্রীপদাম্বুজঃ॥ **18**॥

দামোদরো যজ্ঞভোক্তা দানৱেন্দ্রৱিনাশকঃ।
নারাযণঃ পরং ব্রহ্ম পন্নগাশনৱাহনঃ॥ **19**॥

জলক্রীডাসমাসক্তগোপীৱস্ত্রাপহারকঃ।
পুণ্যশ্লোকস্তীর্থপাদো ৱেদৱেদ্যো দযানিধিঃ॥ **20**॥

সর্ৱতীর্থাত্মকঃ সর্ৱগ্রহরূপী পরাৎপরঃ।
এৱং শ্রীকৃষ্ণদেৱস্য নাম্নামষ্টোত্তরং শতম্॥ **21**॥

কৃষ্ণনামামৃতং নাম পরমানন্দদাযকম্।
অত্যুপদ্রৱদোষঘ্নং পরমাযুষ্যৱর্ধনম্॥ **22**॥

॥ ইতি শ্রীকৃষ্ণাষ্টোত্তরশতনামস্তোত্রং সমাপ্তম্॥